International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(3): 106-109
© 2024 IJSR
www.anantaajournal.com
Received: 22-03-2024
Accepted: 26-04-2024

**R Sivaranjani**
Research Scholar, Department of Oriental Studies and Research, SASTRA Deemed to be University, Thanjavur, Tamil Nadu, India

**Dr. S Thiagarajan**
Research Supervisor, Department of Oriental Studies and Research, SASTRA Deemed to be University, Thanjavur, Tamil Nadu, India

**Corresponding Author:**
**R Sivaranjani**
Research Scholar, Department of Oriental Studies and Research, SASTRA Deemed to be University, Thanjavur, Tamil Nadu, India

# नृसिंहतापनीयोपनिषदन्तर्गतस्य नृसिंहमन्त्रराजस्य विवेचनम्

**R Sivaranjani and Dr. S Thiagarajan**

## प्रस्तावना

उग्रं वीरं महाविष्णुं ज्वलनं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्योर्मृत्युं नमाम्यहम् ।।

वेदाः इति भारतस्य आधारभूताः। तत्रापि वेदान्तः तावत् आत्मतत्त्वस्य अवबोधकविषयः। एवञ्च बह्व्यः उपनिषदः सन्ति इति जगत्प्रसिद्धम्। तत्रापि विशिष्टा काचित् उपनिषदस्ति 'नृसिंहतापिन्युपनिषद्'। एषा तावत् द्विधा विभक्ता 'पूर्वतापिनी' 'उत्तरतापिनी' च इति। पूर्वतापिन्युपनिषदि प्रथमोपनिषद्, द्वितीयोपनिषद् इति रीत्या पञ्चोपनिषदः सन्ति। उत्तरतापिन्युपनिषदि च अष्टोपनिषदः सन्ति।

इयं कं विषयमाधारीकृत्य वदति इति दृष्टे तु श्रीमहाविष्णोः अवतारस्य नृसिंहस्य परमकारुण्यमूर्तेः विषये वदति। अस्यां तु नृसिंहदेवः 'शङ्करः', 'नीललोहितः' 'उमापतिः' इति नामभिः वर्णितः वर्तते। अस्याः उपनिषदः भाष्यकाराः सन्ति परमपूजनीयाः श्रीमदादिशङ्कराचार्यभगवत्पादाः। श्रीमदादिशङ्कराचार्यभगवत्पादैः कृतस्य भाष्यस्यैव प्रामुख्येन इयमपि प्रमुखा जाता।

इयम् उपनिषद् "भद्रं कर्णेभिः श्रृणुयाम देवाः" इति मङ्गलश्लोकेन आरभ्यते।

अस्याम् उपनिषदि तावत् गूढस्य मन्त्रराजस्य उपदेशः अस्ति। भगवतः ब्रह्मणः पुरतः बद्धाञ्जलयः सन्तः देवाः तेषां तापनिवारणार्थं कञ्चित् उपायं प्रार्थयन्ति। तदा ब्रह्मणः मुखात् निस्सृतः उपदेशः वर्तते नृसिंहमन्त्रराजः। अयं मन्त्रः तावत् अनुष्टुप्-छन्दसि वर्तते।

अधुना पूर्वतापिनी इति प्रथमभागस्य विषयाः अवलोक्यते।

**प्रथमोपनिषद्**: अत्र तावत् नृकेसरिरूपे वरदाभयहस्ते योगारूढे त्रिनेत्रे शङ्करे पिनाकहस्ते सच्चिदानन्दमये ब्रह्मविवर्तोपासनं दत्तम् अस्ति। शङ्कर इति सम्बोधनेन नृसिंहमूर्तिनं मङ्गलकारकमिति प्रस्तुवन्ति। यद्यपि तस्य भीषणा आकृतिः भयमुत्पादयति तथापि सः परमकरुणया भक्तेभ्यः मङ्गलमेव ददाति इति भावनिरूपणम्।

**द्वितीयोपनिषद्**: द्वितीयोपनिषदि प्रणवोपासनस्य गाथा वर्णिता अस्ति। अस्मिन् देवाः प्रजापतिम् उपसृत्य मरणपापाकुटुम्बजीवनादिभिः भीताः निवृत्तिमार्गम् अयाचन्त। ततः प्रजापतिना मन्त्रराजः तान् प्रति उपदिष्टः। अयं मन्त्रस्तावत् अनुष्टुपि वर्तते।

**तृतीयोपनिषद्**: अनुष्टुप्-मन्त्रराजस्य शक्तेः अवगमनाय याचन्ते स्म देवाः। तदा विधात्रा शक्तिबीजस्य उपदेशः कृतः। एषा नारसिंही शक्तिः सर्वं सृजति रक्षति संहरति च। एषा शक्तिः कथं वा उच्चारणीया, ह्रस्वा वा दीर्घा वा प्लुता वा इति पृष्टे सति ब्रह्मदेवः वदति –

"यदि ह्रस्वा भवति सर्वं पाप्मानं दहत्यमृतत्वं च गच्छति । यदि दीर्घा भवति महतीं श्रियमाप्नुयादमृतत्वं च गच्छति । यदि प्लुता भवति ज्ञानवान्भवत्यमृतत्वं च गच्छति ।"

- नृसिंहतापन्युपनिषद्, पूर्वतापिनी, तृतीयोपनिषद्।

**चतुर्थ्युपनिषद्**: देवैः "मन्त्रराजस्य नारसिंहस्याङ्गमन्त्रान् नः ब्रूहि भगवन्" इति पृष्टे सति सः ब्रह्मदेवः उवाच

"प्रणवं सावित्रीं यजुर्लक्ष्मीं नृसिंहगायत्रीमित्यङ्गानि जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति।।"

- नृसिंहतापन्युपनिषद्, पूर्वतापिनी, चतुर्थ्युपनिषद्।

ओमिति एतदक्षरमेव सर्वम्। अयं प्रणवः ब्रह्म आत्मा प्रज्ञः सर्वकालातीतः च।

चतुर्थोपनिषदि एव नृसिंहगायत्रीमन्त्रः अपि उपदिष्टः वर्तते। तद्यथा–

"ॐ नृसिंहाय विद्महे वज्रनखाय धीमहि । तन्नः सिंहः प्रचोदयात् ।।"

- नृसिंहतापन्युपनिषद्, पूर्वतापिनी, चतुर्थ्युपनिषद्।

**पञ्चम्युपनिषद्**: पञ्चम्युपनिषदि देवाः महाचक्रमधिकृत्य ब्रह्माणं पृच्छन्ति। तदा ब्रह्मदेवः सुदर्शनचक्रस्य विषये तान् बोधयति।

"स होवाच प्रजापतिः षडक्षरं वा एतत्सुदर्शनं महाचक्रं तस्मात्षडरं भवति षट्पत्रं चक्रं भवति...।।"

- नृसिंहतापन्युपनिषद्, पूर्वतापिनी, पञ्चम्युपनिषद्।

अनया रीत्या ब्रह्मदेवः सुदर्शनचक्रस्य स्वरूपं वर्णयति। चक्रस्य मध्यभागे 'ओं श्रोम्' इति अक्षरं भवति। ततः षड् पटलानि भवन्ति येषु 'सहस्रार हुं फट्' इति लिखितं भवति। ततः परम् अष्टाक्षरैः मुद्रितानि अष्टपटलानि 'ओं नमो नारायणाय' इति अक्षरैः मुद्रितानि भवन्ति। ततः द्वादशपटलेषु 'ओं नमो भगवते वासुदेवाय' इत्येतैः द्वादशाक्षरैः मुद्रितः भवति। ततः षोडशपटलेषु मातृकाबीजानि, ततः द्वात्रिंशत्पटलेषु नृसिंहमन्त्रराजस्य मुद्रणं कृतं भवति। नित्यं मन्त्रराजस्योच्चारणेन अग्निवायुसूर्यचन्द्रजलदेवग्रहविषाणां च नियन्त्रणं कर्तुं शक्नुयुः तद्वक्तारः एवञ्च उत्तरतापणीये नव उपनिषदः सन्ति।

**प्रथमखण्डः** प्रथमे देवाः आत्मरहस्यम् ज्ञातुम् इच्छन्ति। ततः तथास्तु इति अनुग्रहवचनैः ब्रह्मा तदुपदिष्टवान्। सोऽवदत् यत् ओङ्कार इत्येकाक्षरं ब्रह्म अस्ति। तदेव भूतं वर्तमानं भविष्यत् च अस्ति। तेन सह आत्मा युक्तः अस्ति। तत् ब्रह्म जननमरणादिरहितम् अस्ति। जीवः ओङ्कार इत्यक्षरस्य ध्यानं कुर्यात्। तद्यथा –

"तदेकमजरममृतमभयमोमित्यनुभूय तस्मिन्निदं सर्वं त्रिशरीरमारोप्य तन्मयं हि तदेवेति संहरेदोमिति तं वा एतं त्रिशरीरमात्मानं त्रिशरीरं परं ब्रह्मानुसन्दध्यात्स्थूलत्वात् स्थूलभुक्त्वाच्च सूक्ष्मत्वात्सूक्ष्मभुक्त्वाच्चैक्यादानन्दभोगाच्च सोऽयमात्मा चतुष्पाज्जागरितस्थानः स्थूलप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुक् चतुरात्मा विश्वो वैश्वानरः प्रथमः पादः ॥"

- नृसिंहतापन्युपनिषद्, उत्तरतापिनी, प्रथमखण्डः।

ततश्च स्वप्नावस्थायां सप्ताङ्गः एकोनविंशतिमुखः चतुरात्मतैजसः हिरण्यगर्भश्च इत्यादिभिः विषयैः आत्मानं वर्णयति।

**द्वितीयखण्डः** द्वितीये ब्रह्मस्वरूपस्य अवस्थाचतुष्टयं वाञ्छन्ति देवाः।

**तृतीयेखण्डः** तृतीये मूलाधारस्य अग्निमण्डले वर्तमानस्य चिदग्निस्वरूपस्य प्रणवध्यानं कथं स्यादिति उपदेशः दीयते।

**चतुर्थखण्डः** चतुर्थखण्डे तु तुरीयप्रणवेन युतं परब्रह्मस्वरूपं नवगुणितम् ओङ्कारात् ध्यायेत् इति उपदिशति। तस्य च पर्यायरूपेण नृसिंहमन्त्रराजः इति कथ्यते ब्रह्मणा।

**पञ्चमखण्डः** पञ्चमे तावत् अस्य च अनुष्ठाता लौकिकेः विषयसुखैः आहृष्टः न भवति। "मोक्षं च प्राप्स्यति दिव्यम्" इति उपदिश्यते।

**षष्ठखण्डः** षष्ठे तु देवाः 'आत्मा' इति विषयकं वस्तु कमिति अवगन्तुं जिज्ञासवः आसन्। ततश्च आसुरीसम्पत् कथं तदुपरि आरोपितमिति च। ततः निवृत्त्यै ते तुरीयं नृसिंहं वन्दन्ते। ओङ्कारज्योतिरेव परं ब्रह्म इति ज्ञानं प्राप्नुवन्ति।

"ओङ्कार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेदैष वीरो नारसिंहेन वाऽनुष्टुभा मन्त्रराजेन तुरीयं विद्यादेष ह्यात्मानं प्रकाशयति।" - नृसिंहतापन्युपनिषद्, उत्तरतापिनी, द्वितीयखण्डः।

**सप्तमखण्डः** – सप्तमे तु –

"तस्य ह वै प्रणवस्य या पूर्वा मात्रा सा प्रथमपादोभयतो भवति द्वितीया द्वितीयस्य तृतीया तृतीयस्य चतुर्थः...........।।" - नृसिंहतापन्युपनिषद्, उत्तरतापिनी, तृतीयखण्डः

इत्यादिभिः उपदेशवाक्यैः ब्रह्मदेवः अकार-उकार-मकाराणां मात्राणां संयोगं ततश्च तुरीये ब्रह्मणि लयः ततः ओङ्कारार्थं च बोधयति।

**अष्टमखण्डः** अष्टमे च एवं स एव अद्वितीयः अनादिः तुरीयस्य आत्मा नृसिंहः ओङ्कारश्च अभिन्नौ। इदं यः अवगच्छेत् सः मृत्युं जयति इति बोध्यते।

**नवमखण्डः** नवमे च खण्डे देवाः प्रजापतिम् उपगम्य 'ओङ्कारात्मा' इति विषयं ज्ञातुं जिज्ञासां प्रकटयति। यः नृसिंहः सर्वसाक्षिरूपेण तिष्ठति, यः च अद्वितीयः, यः च निस्स्पृहः, यः मायायाः भिन्नरूपं धारयति, यः च परमात्मा इति कथ्यते सः एव ओङ्कारात्मा इति बोधयति प्रजापतिः।

"अहमेव तत् तदेवाहम्" इति प्रजापतिः तान् प्रति स्पष्टीकरोति। आत्मज्ञानं परमं ज्ञानमिति देवाः ज्ञातवन्तः।

## उपसंहार

अस्यां तापनीयोपनिषदि नृकेसरिरूपस्य वर्णनं प्रणवोपासनं मन्त्रराजः तस्य च बीजाक्षराणि, आत्मा, ओङ्कारात्मा इत्यादीन् विषयान् आधारीकृत्य ब्रह्मणः मुखादेव देवाः उपदेशरूपेण प्राप्तवन्तः। तस्य च भाष्यपठनेन स्पष्टावगमनम अस्ति। यद्यपि एतादृशाः आत्मनिर्दिष्टाः विषयाः अवर्णिताः दृश्यन्ते तथापि,

'उग्रं वीरं महाविष्णुं ज्वलन्तं विश्वतोमुखम्।
नृसिंहं भीषणं भद्रं मृत्योर्मृत्युं नमाम्यहम्।।'

इति अयं मन्त्रराजः एव विशेषतः उपदिष्टः वर्तते इति। ततश्च अस्यैव मन्त्रस्य उच्चारणेन भक्ताः तापविमुक्ताः भवन्ति इति। पुनश्च करुणापरस्य नृसिंहमूर्तिनः परमकृपाकटाक्षस्य च प्राप्तिः भवति इति च ज्ञायते। अतः अस्याः उपनिषदः वैशिष्ट्यं नृसिंहमन्त्रराजे एव निहितमस्ति इति मम मतम्।

## सहायकग्रन्थसूची


1. नृसिंहतापनीयोपनिषद् श्रीमच्छाङ्करभाष्यसहिता, (सम्पादकः) श्रीमान् विनायक-गणेश-आपटे, आनन्दाश्रममुद्रालयः, पुण्यपत्तनम्, 1929
2. नृसिंहतापिनी उपनिषद् -व्यास महाभारतम् (Vyasa Online)
3. Nrusimha Tapaniya Upanishad-translation,
4. VedaRahasya.Net
5. Narasimha Purva Tapini.pdf
6. ( sadagopan.org)
7. Nrisimha Poorva Tapaniya Upanishad (Vedanta Spiritual Library)
8. Narasimha Mantra Meaning and Benefits( Times of India report)